तरीतृपम् २ ; } [1]तृप्रः, [2]तृपला.
तरीतृपित्वा २ ;}

(771) "तृप प्रीणने" (V-स्वादिः-1271. सक. सेट्. पर.) [अ]

'तृप्नोति तृप्यतीत्येते प्रीणने श्नौ श्यनि क्रमात् ।
तृपावन्यतरस्यां णौ स्याताम् तर्पति तर्पयेत् ॥' (श्लो. 133) इति देवः ।

तर्पकः-र्पिका, तर्पकः-र्पिका, तितर्पिषकः-षिका, तरीतृपकः-पिका ;
तर्पिता-त्री, तर्पयिता-त्री, तितर्पिषिता-त्री, तरीतृपिता-त्री ;
[3]तृप्नुवन्-ती, तर्पयन्-न्ती, तितर्पिषन्-न्ती ; —
तर्पिष्यन्-न्ती-ती, तर्पयिष्यन्-न्ती-ती, तितर्पिषिष्यन्-न्ती-ती ; —
— तर्पयमाणः, तर्पयिष्यमाणः, — तरीतृप्यमाणः, तरीतृपिष्यमाणः ;
प्रतृप्-प्रतृब्-प्रतृपौ-प्रतृपः ; — — —
तृपितम्-तः, तर्पितः, तितर्पिषितः, तरीतृपितः-तवान् ;
तृपः, तर्पः, तितर्पिषुः, तरीतर्पः ;
तर्पितव्यम्, तर्पयितव्यम्, तितर्पिषितव्यम्, तरीतृपितव्यम् ;
तर्पणीयम्, तर्पणीयम्, तितर्पिषणीयम्, तरीतृपणीयम् ;
[4]तृप्यम्, तर्प्यम्, तितर्पिष्यम्, तरीतृप्यम् ;
ईषत्तर्पः-दुस्तर्पः-सुतर्पः ; — — —

---

1. 'स्फायितञ्चि—' [ द. उ. 8-31] इति रक्प्रत्ययः । तृप्रः=पुरोडाशः ।
2. 'कलस्तृपश्च' [द. उ. 8-107] इति कलप्रत्ययः । तृपला=लताविशेषः ।
3. शतरि, 'स्वादिभ्यः—' (3-1-73) इति श्नुः विकरणप्रत्ययः । 'अचि श्नुधातु—' (6-4-77) इत्युवङ् । 'क्षुभ्नादिषु च' (8-4-39) इति णत्वनिषेधः ।
4. 'ऋदुपधाच्चाक्लृपिचृतेः' (3-1-110) इति क्यप्प्रत्ययः ।

[अ] स्वादिषु केषाञ्चिन्मतेनास्य धातोः पाठः । 'स्वादौ क्षुभ्नादित्वात् (8-4-39) पाठ उन्नेयः ।' इति क्षीरस्वामी । देवोऽपि स्वादिषु पाठमनुमेने । अनिट्कारिकासु 'तृप्यतिदृप्यती सृपिम्' (काशिका 7-2-10) इति श्यना निर्देशव्यावर्त्यत्वेन 'तुदादिषु यौ तृपिदृपी, तावुदात्तौ' इति वृत्तिकारेणाभिधानात् तदनुसारिणो न्यासकारादयः स्वादिपाठं नेच्छन्ति । क्षुभ्नादिषु णत्वनिषेधार्थं 'तृप्नु' इति पाठे व्यत्ययेन श्नुः इति न्यासकारादीनां मतम् । देवश्लोकपरामर्शनेन देवस्य तुदादिष्वेव पाठोऽस्य धातोरनभिमत इति प्रतीयते । सिद्धान्तकौमुद्याद्यनुसारेणास्माभिरयं धातुर्लिखितः ।